শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে একসপ্ততিতমং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে একসপ্ততিতমং দশকম্ ॥

## কেশিমথনৱর্ণনং, ৱ্যোমৱধৱর্ণনং চ

যত্নেষু সর্ৱেষ্ৱপি নাৱকেশী
    কেশী স ভোজেশিতুরিষ্টবন্ধুঃ।
ৎৱাং সিন্ধুজাৱাপ্য ইতীৱ মৎৱা
    সম্প্রাপ্তৱান্ সিন্ধুজৱাজিরূপঃ ॥ **71.1** ॥

গন্ধর্ৱতামেষ গতোঽপি রূক্ষৈ -
    র্নাদৈঃ সমুদ্বেজিতসর্ৱলোকঃ।
ভৱদ্বিলোকাৱধি গোপৱাটীং
    প্রমর্দ্য পাপঃ পুনরাপতৎ ৎৱাম্ ॥ **71.2** ॥

তার্ক্ষ্যার্পিতাঙ্ঘ্রেস্তৱ তার্ক্ষ্য এষ
    চিক্ষেপ ৱক্ষোভুৱি নাম পাদম্।
ভৃগোঃ পদাঘাতকথাং নিশম্য
    স্ৱেনাপি শক্যং তদিতীৱ মোহাৎ ॥ **71.3** ॥

প্রৱঞ্চযন্নস্য খুরাঞ্চলং দ্রা -
    গমুং চ চিক্ষেপিথ দূরদূরম্।
সম্মূর্চ্ছিতোঽপি হ্যতিমূর্চ্ছিতেন
    ক্রোধোষ্মণা খাদিতুমাদ্রুতস্ৎৱাম্ ॥ **71.4** ॥

ৎৱং ৱাহদণ্ডে কৃতধীশ্চ ৱাহা -
    দণ্ডং ন্যধাস্তস্য মুখে তদানীম্।

তদ্বুদ্ধিরুদ্ধশ্বসনো গতাসুঃ
সপ্তীভবন্নপ্যযমৈক্যমাগাৎ॥ **71.5**॥

আলম্ভমাত্রেণ পশোঃ সুরাণাং
প্রসাদকে নূত্ন ইবাশ্বমেধে।
কৃতে ৎবযা হর্ষবশাৎ সুরেন্দ্রা -
স্ত্বাং তুষ্টুবুঃ কেশবনামধেযম্॥ **71.6**॥

কংসায তে শৌরিসুতৎবমুক্ত্বা
তং তদ্বধোৎকং প্রতিরুধ্য বাচা।
প্রাপ্তেন কেশিক্ষপণাবসানে
শ্রীনারদেন ৎবমভিষ্টুতোঽভূঃ॥ **71.7**॥

কদাপি গোপৈঃ সহ কাননান্তে
নিলাযনক্রীডনলোলুপং ৎবাম্।
মযাত্মজঃ প্রাপ দুরন্তমাযো
ব্যোমাভিধো ব্যোমচরোপরোধী॥ **71.8**॥

স চোরপালাযিতবল্লবেষু
চোরাযিতো গোপশিশূন্ পশূংশ্চ।
গুহাসু কৃৎবা পিদধে শিলাভি -
স্ত্বযা চ বুদ্ধ্বা পরিমর্দিতোঽভূৎ॥ **71.9**॥

এবং বিধৈশ্চাদ্ভুতকেলিভেদৈ -
রানন্দমূর্ছামতুলাং ব্রজস্য।
পদে পদে নূতনযন্নসীমাং
পরাত্মরূপিন্ পবনেশ পাযাঃ॥ **71.10**॥

॥ ইতি শ্রীমন্নারাযণীযে একসপ্ততিতমং দশকং সমাপ্তম্॥